
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# संस्कृतकवीनाम् उच्चतमसञ्ज्ञानात्मककौशलानि

## High Order Thinking Skills of Sanskrit Poets

**डाँ. जि. सूर्यप्रसादः**
**सहायकाचार्यः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः, मुख्यालयः, नवदेहली**

**शोधसारः**

काव्यकवनमेव सर्जनात्मकता। विश्लेषणं, मूल्याङ्कनं, सर्जनात्मकता च ***उच्चतमसञ्ज्ञानात्मककौशलत्वेन उच्चक्रमचिन्तनकौशलत्वेन*** (HOTS) वा ब्लूम् महोदयेन स्वीकृतानि। तत्र *सर्जनात्मकता* सर्वोत्तमं **उच्चतमसञ्ज्ञानात्मककौशलं** भवति। एतानि सञ्ज्ञानात्मक-आयामस्य षट्सु उप-आयामेषु अन्यतमानि भवन्ति। उच्चक्रमचिन्तनकौशलानां[1](HOTS) सम्पादनाय अधिकजटिलस्य, उच्चस्तरस्य चिन्तनस्य आवश्यकता भवति।

वस्तुतः मानवस्य विकासः तिसृषु पक्षेषु भवति, यथा – सञ्ज्ञानात्मक-आयामः, भावात्मक-आयामः, क्रियात्मक-आयामश्च। एतदेव मनसि निधाय ब्लूम् महोदयेन शिक्षणोद्देश्यानां वर्गीकरणम् त्रिधा कृतं सञ्ज्ञानात्मक-भावात्मक-क्रियात्मक-आयामाः इति। सञ्ज्ञानात्मक-आयामे ये उप-आयामाः सन्ति, ते एव उच्चक्रमचिन्तनकौशलं (HOTS), निम्नक्रमचिन्तनकौशलं (LOTS) इति नाम्ना द्विधा वर्गीकृतम्।

कवयः किमपि अलौकिकमेव नूतनं वस्तु सृजन्ति। तस्य सर्जनस्य आधारः भवति चिन्तनम्। स्वीय-उच्चतमचिन्तनकौशलेन सरस्वतीं काञ्चिच्चमत्कारपूर्णामाविष्कुर्वन्ति। एवं कवीनां सर्वेषां *उच्चतमचिन्तनकौशलं उच्चतमसञ्ज्ञानात्मककौशलं वा* अनिवार्यम्।

प्रथमे हि कवयः संस्कृतकवयः, यतो हि तत्पूर्वं जगति काव्यरचनाभावात्। तर्हि संस्कृतकवयः, संस्कृतवैयाकरणाः, विभिन्नशास्त्रप्रणेतारः सर्वेपि **उच्चतमसञ्ज्ञानात्मककौशल**युक्ताः। एतेषां सर्वेषां कवि-वैयाकरण-विभिन्नशास्त्रप्रणेतृणाम् **उच्चतमसञ्ज्ञानात्मककौशलानि** यद्यपि प्रदर्शनीयानि, तथापि केवलं काव्यमाधारीकृत्य, कवीन् आधारीकृत्य, कविष्वपि चित्रकाव्यप्रणेतृन् तथैव द्व्यर्थिकाव्यादिनिर्मातृन् आधारीकृत्य ईषण्मात्रं **संस्कृतकवीनाम् उच्चतमसञ्ज्ञानात्मककौशलानि** अत्र प्रदर्शितानि।

**प्रमुखशब्दाः**

उच्चतमसञ्ज्ञानात्मककौशलं, उच्चक्रमचिन्तनकौशलं, संस्कृतकवयः, काव्यानि।

**प्रस्तावना**

यस्यां कस्यामपि भाषायां वा भवतु, काव्यरचना वस्तुतः सर्जनात्मकतां परिचाययति। कवयः सर्जनशीलाः। काव्यकवनमेव सर्जनात्मकता। कवयः किमपि अलौकिकमेव नूतनं वस्तु सृजन्ति। तस्य सर्जनस्य आधारः भवति चिन्तनम्। स्वीय-उच्चतमचिन्तनकौशलेन सरस्वतीं काञ्चिच्चमत्कारपूर्णामाविष्कुर्वन्ति।

[1] chrome-extension://efaidnbmnnnibpcajpcglclefindmkaj/https://potentialplusuk.org/wp-content/uploads/2018/06/S306-Higher-Order-Thinking-Skills-180611.pdf

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

अपारे काव्यसंसारे कविरेव प्रजापतिः। यदस्मै रोचते विश्वं तथेदं परिवर्तते।। इत्युक्तदिशा कवयः नवनवोन्मेषशालिन्या प्रतिभया नूतनसृष्टिं रचयन्ति। एषैव कवीनां नवनवोन्मेषशालिनी प्रतिभा सकल**सञ्ज्ञानात्मककौशलानां समाहारत्वेन** स्वीक्रियते।


तर्हि किमेतानि **सञ्ज्ञानात्मककौशलानि** इति सम्प्रति निरूप्यते।

## विषयोपस्थापनम्

## सञ्ज्ञानात्मककौशलानि

संज्ञानात्मककौशलानि षट् सन्ति। एतानि ब्लूम् महोदयेन प्रोक्तानि। तत्रैव तेन उच्चक्रमचिन्तनकौशलं (HOTS), निम्नक्रमचिन्तनकौशलं (LOTS) इति नाम्ना भेदद्वयं प्रदर्शितम्।

उच्चक्रमचिन्तनकौशलं[2] (HOTS) ताः संज्ञानात्मकप्रक्रियाः सन्ति येषु अधिकजटिलस्य, उच्चस्तरस्य चिन्तनस्य आवश्यकता भवति। ताः संज्ञानात्मकप्रक्रियाः तिस्रः सन्ति, यथा – विश्लेषणं, मूल्याङ्कनं, सर्जनात्मकता च। Higher Order Thinking Skills (HOTS) are the cognitive processes that require thinking at a more complex, higher level. High potential learners often master the lower order tasks very quickly and need to think more deeply about topics. Planning a higher order thinking task or question into every lesson is a good way of ensuring all learners are given the opportunity to think at a high level, whilst ensuring the lesson interests and challenges high potential learners.




**चित्रम् - १**


उच्चसंज्ञानात्मकशक्तिमन्तः प्रायः निम्नक्रमस्य कार्येषु (LOTS) अतीव शीघ्रं निपुणाः भवन्ति, तेषां विषयेषु अधिकं गभीरं चिन्तनस्य आवश्यकता भवति। येषां निम्नक्रमचिन्तनकौशलं (LOTS) वर्तते तेषामेव उच्चक्रमचिन्तनकौशलेषु (HOTS) निपुणता समायाति।

एतत् उच्चक्रमचिन्तनकौशलस्य (HOTS), निम्नक्रमचिन्तनकौशलस्य (LOTS) वर्गीकरणमेव **Bloom's taxonomy** इत्यस्य सञ्ज्ञानात्मकायामस्य षड् उप-आयामाः भवन्ति।

[2] chrome-extension://efaidnbmnnnibpcajpcglclefindmkaj/https://potentialplusuk.org/wp-content/uploads/2018/06/S306-Higher-Order-Thinking-Skills-180611.pdf


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in




**चित्रम् - २**

वस्तुतः मानवस्य विकासः तिसृषु पक्षेषु भवति, यथा – सञ्ज्ञानात्मक-आयामः, भावात्मक-आयामः, क्रियात्मक-आयामश्च। एतदेव मनसि निधाय ब्लूम् महोदयेन शिक्षणोद्देश्यानां वर्गीकरणम् त्रिधा कृतं सञ्ज्ञानात्मक-भावात्मक-क्रियात्मक-आयामाः इति।

सञ्ज्ञानात्मक-आयामे ये उप-आयामाः सन्ति, ते एव उच्चक्रमचिन्तनकौशलं (HOTS), निम्नक्रमचिन्तनकौशलं (LOTS) इति नाम्ना द्विधा वर्गीकृतम्।

**Bloom's taxonomy** is a set of three hierarchical models used for classification of educational learning objectives into levels of complexity and specificity. The three lists cover the learning objectives in cognitive, affective and psychomotor domains. The cognitive domain list has been the primary focus of most traditional education and is frequently used to structure curriculum learning objectives, assessments and activities.

The models were named after Benjamin Bloom, who chaired the committee of educators that devised the taxonomy.[3]

## विषयानुशीलनम्

संस्कृतकवयः, संस्कृतवैयाकरणाः, विभिन्नशास्त्रप्रणेतारः सर्वेपि **उच्चतमसञ्ज्ञानात्मककौशल**युक्ताः, यतो हि ते सर्वे सर्जनशीलाः। *सर्जनात्मकता* सर्वोत्तमं **उच्चतमसञ्ज्ञानात्मककौशलं** भवति। एतेषां सर्वेषां कवि-वैयाकरण-विभिन्नशास्त्रप्रणेतृणाम्

[3] https://en.wikipedia.org/wiki/Bloom%27s_taxonomy

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**उच्चतमसज्ज्ञानात्मककौशलानि** यद्यपि प्रदर्शनीयानि, तथापि काव्यमाधारीकृत्य, कवीन् आधारीकृत्य, कविष्वपि चित्रकाव्यप्रणेतृन् आधारीकृत्य ईषण्मात्रं **संस्कृतकवीनाम् उच्चतमसज्ज्ञानात्मककौशलानि** सम्प्रति प्रस्तूयते।

काव्यकवनमेव सर्जनात्मकता। तत्रापि उत्तमकाव्यरचना सर्वोत्कृष्टा। काव्यस्यात्मा ध्वनिरिति बुधैः इत्यादिना काव्ये ध्वनेः मुख्यत्वप्रतिपादनाय बहुतर्काः (**उच्चतमसज्ज्ञानात्मककौशलानि**) यद्यपि आनन्दवर्धनेन प्रोक्ताः, तथापि ते सर्वेपि व्यक्तिविवेककृतः खण्डन-दोषप्रदर्शनमाध्यमेन (**उच्चतमसज्ज्ञानात्मककौशलानां माध्यमेन**) निरस्ताः इति विदन्त्येव विद्वांसः। एवम् आलङ्कारिकाणाम् **उच्चतमसज्ज्ञानात्मककौशलानि** अपि लक्षणग्रन्थेषु समुपलभ्यते।

आलङ्कारिकैः उत्तम-मध्यम-अवरभेदेन काव्यस्य त्रैविध्यमङ्गीकृतम्। तत्र काव्यप्रकाशकृता **इदमुत्तमम् अतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः** इति उत्तमकाव्यस्य लक्षणमुक्तम्। तथैव मध्यमकाव्यस्य, अवरकाव्यस्य चापि।

बहवः कवयः कालिदासादयः नैकानि काव्यानि रचयामासुः। कालिदास-भारवि-माघ-श्रीहर्षादिभिः रचितानि काव्यानि महाकाव्यत्वेन प्रथन्ते। एतेषु सर्वेषु महाकाव्येषु स्थितः प्रत्येकमपि श्लोकः (प्रत्येकमपि काव्यं) तत्तत्कवीनां **उच्चतमसज्ज्ञानात्मककौशलानि** नितरां प्रदर्शयति। अलङ्कार-ध्वनि-रीति-छन्दोनियमाननुसृत्य कृता एषा काव्यरचना न तथा सुकरं कर्म। तथापि तत्तत्कवीनां **उच्चतमसज्ज्ञानात्मककौशलानां** कारणेन काव्यरचना अत्यन्तं सहजतया सरलतया जातेति वक्तुं शक्यते।

यद्यपि संस्कृतकाव्येषु यानि उत्तमकाव्यानि (उत्तमश्लोकाः अलङ्कारशास्त्रदृष्ट्या), यानि च मध्यमकाव्यानि (मध्यमश्लोकाः अलङ्कारशास्त्रदृष्ट्या) तत्तत्कवीनां *उच्चतमसज्ज्ञानात्मककौशलानाम्* उदाहरणत्वेन प्रदर्शयितुं शक्यते, तथापि अवरकाव्येपि कथम् *उच्चतमसज्ज्ञानात्मककौशलानि* प्रदर्शितानीति सम्प्रति प्रदर्श्यते। *(अवरकाव्यमेव उच्चतमसज्ज्ञानात्मककौशलयुक्तं, तर्हि उत्तमकाव्यानां विषये वक्तव्यस्य का अपेक्षा? इति भावः।)*

**संस्कृतकवीनां उच्चतमसज्ज्ञानात्मककौशलम्**

***वर्णचित्रकाव्यानि***

कश्चन संस्कृतकविः किमपि विशिष्टमेव काव्यं कृतवान् यत्र सर्वैः व्यञ्जनवर्णैः तत्क्रमानुसारं काव्यं लिखितं–

कः खगौघाङचिच्छौजा झाञ्ज्ञोऽटौठीडडण्ढणः।
तथोदधीन् पफर्बाभीर्मयोऽरिल्वाशिषां सहः॥[4]

अपरः कश्चन कविः केवलं **द,व,न** इति व्यञ्जनवर्णैः एव चमत्कृतिपूर्णम् अन्यत्काव्यं लिखितवान् –

देवानां नन्दनो देवो नोदनो वेदनिन्दिनाम्।
दिवं दुदाव नादेन दाने दानवनन्दिनः॥[5]

शिशुपालवधे अद्भुतमेव द्व्यक्षरैः काव्यं, एकाक्षरकाव्यं च लिखितं कविना माघेन –

भूरिभिर्भारिभिर्भीराभूभारैरभिरेभिरे।
भेरीरेभिभिरभ्रा भैरभीरुभिरिभैरिभाः॥[6]

दादादो दुद्दुद्दादी दादादो दूददीददोः।

[4] Quoted in Sarasvati Kanthabharanam of Bhoja 2.263
[5] Quoted in kavyadarsa of Dandi, 3.93 and Sarasvati Kanthabharanam of Bhoja 2.260

[6] शिशुपालवधम् 19.66

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

दुद्दादं दददे दुद्दे दादाददददोऽददः ॥[7]

पुनश्च कविना माघेन तत्रैव एकं विशिष्टं चमत्कारपूर्णं काव्यम् एवं लिखितं, यत्र एकस्मिन् पादे एकमेवाक्षरं भवति। यथा-

जजौजाजिजिज्जाजी
ततोऽतितताततुत्।
भाभोऽभीभाभूभाभू-
राराररिररिः ॥[8]

महाकविना भारविनापि विशिष्टं चमत्कारपूर्णं एकाक्षरकाव्यं लिखितम्। यथा-

न नोनुन्नो नुन्नेनो नाना नानानना ननु।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्नुत् ॥[9]

एतानि सर्वाणि वर्णचित्रकाव्यानि भवन्ति। एतादृक्काव्यरचना नितान्तम् उच्चतमसञ्ज्ञानात्मककौशलम् अपेक्षते।

न केवलं वर्णचित्राणि, अपि तु अद्भुतानि स्थानचित्राणि स्वरचित्राणि च लिखितानि संस्कृतकविभिः। यथा–

अगा गाङ्गाङ्गकाकाकगाहकाघककाकहा।
अहाहाङ्क खगाङ्कागकङ्कागखगकाकक ॥[10] अत्र केवलं कण्ठ्यवर्णाः एव प्रयुक्ताः।

***स्वरचित्रकाव्यानि***

सम्प्रति स्वरचित्रचमत्कृतिं पश्यामः –

उरुगुं गुरुं युत्सु चुक्रुशुस्तुष्टुवुः पुरु।
लुलुभुः पुपुषुर्मुत्सु मुमुहुर्नु मुहुर्मुहुः ॥[11] अत्र स्वरत्वेन केवलम् उकारः एव प्रयुक्तः।

अपरमेकं विशिष्टं चमत्कृतिपूर्णं काव्यं वर्तते, यत्र केवलं एकं व्यञ्जनं (य्) एकः स्वरः (आ) उपयुक्तः –

यायायायायायायायायायायायायायायाया।
यायायायायायायायायायायायायायायाया॥[12]

यायाया (yāyāyā), आय (āya), आयाय (āyāya), अयाय (ayāya), अयाय (ayāya), अयाय (ayāya), अयाय (ayāya), अयाया (ayāyā), यायाय (yāyāya), आयायाय (āyāyāya), आयाया (āyāyā), या (yā), या (yā), या (yā), या (yā), या (yā), या (yā), या (yā), या (yā).

***अनुलोमकाव्यं - विलोमकाव्यञ्च***

रामकृष्णविलोमकाव्यम् अपरमेकम् उत्तमम् उदाहरणं भवति संस्कृतकवीनाम् उच्चतमचिन्तनकौशले। अत्र प्रथमपादे रामकथा, द्वितीयपादे कृष्णकथा च निबद्धा। चमत्कारपूर्णविषयस्तु द्वितीयपादः प्रथमपादस्य विलोमपठनेनाविष्क्रियते –

---

[7] तत्रैव 19.114

[8] तत्रैव 19.3

[9] किरातार्जुनीयम् 15.15

[10] भोजस्य सरस्वतीकण्ठाभरणं 2.275

[11] तत्रैव, 2.276

[12] पादुकासहस्रम् (वेदान्तदेशिकस्य) 936

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

तं भूसुतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दयाश्रीः।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम् ॥[13]

***द्व्यर्थिकाव्यानि***

सामान्यतया एकार्थसूचकरचनैव सर्वोत्कृष्टा। तत्रापि केचन कवयः द्व्यर्थिकाव्यानि लिखितवन्तः। यथा -

धनञ्जयकवेः 'राघवपाण्वीयम्, हरदत्तसूरेः "राघवनैषधीयम् विद्यामाधवकवेः 'पार्वतीरुक्मिणीयम्' इत्यादि द्व्यर्थिकाव्यानि प्रसिद्धानि वर्तन्ते।

***त्र्यर्थिकाव्यानि***

रामकृष्णयुधिष्ठिरचरितचम्पूकाव्यम् इत्येतत् त्र्यर्थिकाव्यं भवति। सप्तमश्लोकादारभ्य काव्यसमाप्तिं यावत् सर्वाणि त्र्यर्थिकाव्यानि सन्ति। तत्र एकं सम्प्रति प्रदर्श्यते-

परैरयोध्या मधुरा च मानवैरस्ति प्रपूर्णा वसुसंचयैर्युता।
सुहस्तिजातेति पुरी महोज्ज्वला भासालदुर्गैश्च विराजिता भुवि ॥[14]

| विशेषणानि | रामपरत्वेन व्याख्या | कृष्णपरत्वेन व्याख्या | युधिष्ठिरपरत्वेन व्याख्या | निघण्टुः |
|---|---|---|---|---|
| भुवि | भुवि भूम्यां | | | |
| परैः | परैः श्रेष्ठैः | परैः शत्रुभिः | परैः श्रेष्ठैः | परं दूरान्यमुख्येषु परोऽरिपरात्मनोः। |
| मानवैः | मानवैर्मनुः सूर्यपुत्रः तद्वंशभवैः राजभिः | मानवैर्मनुष्यैः | मानवैर्मनुष्यैः | |
| प्रपूर्णा | प्रपूर्णा संपूर्णा | | प्रपूर्णा | |
| वसुसंचयैः युता | वसुसंचयैः रत्नसमूहैः धनिकसमूहैश्च युता संयुता। | | | "वसुर्मयूखाग्निधनाधिपेषु योक्ते नृपे चापि च देवभेदे। पृथ्व्यौषध स्थानधनेषु रत्ने धने वसु" |
| मधुरा | मधुरा मनोज्ञा | मधुरेतिपूरी तन्नाम नगरी | मधुरा मनोज्ञा | मधुरो ना रसे तद्वद्दयितस्वादुषु त्रिषु।<br><br>मधुरा शतपुष्पा च कथ्यते मधुपुर्यपि। |

[13] रामकृष्णविलोमकाव्यम्, 1.

[14] रामकृष्णयुधिष्ठिरचम्पू 7

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

| | | | | |
|---|---|---|---|---|
| महोज्ज्वला | महोज्ज्वला महैरुत्सवैरुज्ज्वला प्रकाशमाना | | | मह उद्धव उत्सवः – इत्यमरः। |
| भासालदुर्गेश्च | भा कांतिः तद्युक्ताः सालाः प्राकाराः तैः दुर्गेश्च गिरि दुर्गादिभिर्गुप्तस्थानैश्च। दुःखेन गम्यतेऽत्रेति दुर्गम्। तथाह मनुः – “धनुर्दुर्गं महीदुर्ग मब्दुर्गं वार्क्षमेव च। नृदुर्गं। गिरिदुर्गं वा समाश्रित्य वसेन्नृपः”। | | | तथाह मनुः – धनुर्दुर्गं महीदुर्ग मब्दुर्गं वार्क्षमेव च। नृदुर्गं। गिरिदुर्गं वा समाश्रित्य वसेन्नृप।<br><br>दुर्गातु गौर्यां काल्यां च दुर्गं तु नरके पुरे। शैलादिदुर्गमस्थाने त्रिषु।<br><br>प्राकारोवरणः सालः। |
| विराजिता | विराजिता शोभिता। | | | |
| सुहस्तिजाता | सु शोभनानि हस्तिनां गजानां जातानि समूहाः यस्यां सा सुहस्तिजाता। | | सुहस्तिजाता हस्ति नाम्ना राज्ञा जाता उत्पन्ना, सु सुंदरं यथा तथा हस्तिजाता सुहस्तिजाता। तन्निर्मितेत्यर्थः। हस्तिनाख्येति पुरी अस्ति। | जातं जनिसमूहयोः |

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

| | | | | |
|---|---|---|---|---|
| अयोध्या | अयोध्येतिपूरी साकेतनामपूरी अस्ति प्रसिद्धा वर्तते। अयोध्येतिपूरी साकेतनामपूरी अस्ति प्रसिद्धा वर्तते "विद्यतेर्भवतेरस्तेः प्रयोगः शुभसूचकः । कथाकाव्योपक्रमादौ "। इत्युक्तरीत्या ग्रंथोपक्रमे अस्तीति प्रयोगः॥ | अयोध्या योद्धुमशक्या | | अयोध्येतिपूरी साकेतनामपूरी अस्ति प्रसिद्धा वर्तते "विद्यतेर्भवतेरस्तेः प्रयोगः शुभसूचकः । कथाकाव्योपक्रमादौ "। इत्युक्तरीत्या ग्रंथोपक्रमे अस्तीति प्रयोगः॥ स्यात्साकेतमयोध्या च |
| | | ॥शेषं पूर्ववत्समानम्॥ | | |

***पञ्चार्थिकाव्यानि***

पुनश्च पञ्चार्थिकाव्यमपि संस्कृतकविभिः लिखितं -

श्रीरामः प्रदिशेच्छुभं सभवतां हंसस्तुतोऽद्यद्यशाः
सत्यानंदकरः सुरागवरदो गोराजसंसेवितः।
कृष्णोऽनंत मनोज्ञभोगरुचिरः सध्दर्मभृद्विग्रहः
भानीरेजपदस्थितो बुधगुरु प्रस्तुत्यधामाऽघदः[15] ॥

रामकृष्णयुधिष्ठिरचारितचम्पूकाव्यस्य मङ्गलश्लोकोऽयं (मङ्गलकाव्योऽयं) ब्रह्मविष्णुशिवरामकृष्णपरत्वेन व्याख्यातः। अर्थात् पञ्चर्थिकाव्यमिदम्। अत्र ११ विशेषणानि, यथा- श्रीरामः, हंसस्तुतोऽद्यद्यशाः, सत्यानंदकरः, सुरागवरदः, गोराजसंसेवितः, कृष्णः, अनन्तमनोज्ञभोगरुचिरः सध्दर्मभृद्विग्रहः, भानीरेजपदस्थितः, बुधगुरुप्रस्तुत्यधामा अघदः इति। एतेषां पञ्चार्थाः काव्यस्यास्य व्याख्याने यद्यप्युक्ताः तथापि तत्र ६ विशेषणानि एव सम्प्रति प्रदर्श्यन्ते-

| विशेषणानि | ब्रह्मपरत्वेन व्याख्या | विष्णुपरत्वेन व्याख्या | शिवपरत्वेन व्याख्या | रामपरत्वेन व्याख्या | कृष्णपरत्वेन व्याख्या | निघण्टुः |
|---|---|---|---|---|---|---|
| श्रीरामः | श्रिया वाण्या रामः मनोज्ञः सरस्वत्यावास | श्रीरिति रामा भार्या यस्य सः श्रीरामः | श्रिया विषेण रामः श्यामः, नीलकण्ठ | श्रीराम इति पसिद्धः दशरथनंदनः। | श्रिया कांत्या रामः नीलवर्णः। यद्वा | ॥श्री॥ |

15 रामकृष्णयुधिष्ठिरचम्पू. 1

International Journal of Multidisciplinary Educational Research
ISSN:2277-7881(Print); Impact Factor :9.014(2025); IC Value:5.16; ISI Value:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

Cover Page

| | | | | | | |
|---|---|---|---|---|---|---|
| | भूतमुखत्वादित्यर्थः। | लक्ष्मीपतिरित्यर्थः। यद्वा – श्रीशब्दस्य ऋग्यजुः सामवेदसमूहपरत्वात् – "ऋचः सामानियजूंषि, साहि श्रीरमृतासतां"- इति श्रुतेः। तया रामः मनोहरः आगमशिरः प्रतिपाद्यमान इत्यर्थः। यद्वा – रमन्ते योगिनः अस्मिन्निति रामः योगिध्येय इति यावत्। श्रिया युक्तश्चासौ रामश्च श्रीरामः। यद्वा – श्रिया शोभया रामः मनोज्ञः। | इत्यर्थः। यद्वा – श्रिया कान्त्या रामः श्वेतोवा, धवल वर्णत्वादित्यर्थः। | | – श्रीभ्यां कांतिसंपद्भ्यां रामः सुन्दरः। समग्रकान्तिसंपद्भ्यां परिपूर्ण इति भावः। | श्रीर्वेषरचना शोभासंपत्सरलशाखिषु। वाणीलक्ष्मीलवंगेषु विषेबिल्वेऽप्यथत्रिषु।। ।।रामः।। रामः पशुविशेषे स्यात् जामदग्नौ हलायुधे। राघवे चासितश्वेतमनोज्ञेषु च वाच्यवत्।। बले रामो नीलचारुसिते त्रिषु। |
| हंसस्तुतोऽद्यद्यशाः | हंसैः मंत्रैः स्तुतं उद्यद्यशः यस्य सः हंसस्तुतोद्यद्यशाः। मन्त्रप्रकाश्यमानकीर्तिरित्यर्थः। | हंसैर्जीवैः स्तुतं उद्यद्यशः यस्य तथाभूतः। स्वसंरक्षकत्वेन समस्तप्राणिभिः स्तूयमानकीर्तिरित्यर्थः। | हंसः विष्णुः स इव स्तुतोद्यद्यशाः। विष्णुरिव कीर्तिमानित्यर्थः। यद्वा- हंसेन विष्णुना स्तुतं उद्यद्यशो यस्य तथा। विषभक्षणाद्यद्भुत | हंसैः राजभिः स्तुतोद्यद्यशाः। सार्वभौमत्वात् सकलराजस्तूयमानकीर्तिरित्यर्थः। यद्वा- हंसैः तपस्विभिः स्तुतं उद्यद्यशः यस्य। सकलयोगिसंस्तूयमानकीर्तिरित्य | हंसैः राजहंसैः स्तुतोद्यद्यशाः। अधिकधावल्यसंपादनार्थं तैः सेवितकिर्तिरित्यर्थः | ।। हंसः।। जीवे राज्ञि रवौ धर्मे तपस्विनि तुरंगमे। सितपक्षिविशेषे च हंस शब्दो हरावपि। "हंसो विहगभेदे स्यात् धर्मे |


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | कार्यकरत्वात्। यद्वा – हंसः सूर्यश्च। तेन स्तूयमानकीर्तिरित्यर्थः। | र्थः। यद्वा- हंसेन मन्मथेन स्तुतोद्यद्यशाः। जितेन्द्रियत्वात् अत्यन्तसुन्दरत्वाच्च मन्मथेनापि स्तूयमानकीर्तिरित्यर्थः। | | विष्णौ हयांतरे। योगिमंत्रात्मभेदेषु परमात्मनि मन्मथे। रवि श्वेतच्छदौ हंसौ। निर्लोभ नृपतौ विष्णावंतरात्मन्यमत्सरे । यतिभेदे च हंसः स्यात् श्रेष्ठे राजाधिपूर्वके। हंसो निर्लोभ नृपतौ शारीरमरूदंतरे। हयभेदे योगिभेदे मंत्रभेदे विमत्सरे। परमात्मनि विष्णौ च श्रेष्ठे राजाधिपूर्वके। इति। |
| सत्यानंदकरः | सत्ये सत्यलोके आनंदकरः। सत्यलोकसुखप्रदायीति भावः। | सत्ये, तथ्ये आनंदकरः। सर्वेषां सन्मार्गप्रवृत्तप्राणिनां सुखदायीति भावः। | सत्याः गौर्याः आनंदकरः। पतित्वादित्यर्थः। | सत्ये शपथे विषये, आनन्दकरः। पितृवाक्यपरिपालकत्वात् सर्वेषामानंदकर इत्यर्थः। | सत्यायाः सत्यभामायाः आनंदकरः। तस्याः प्रियत्वादिति भावः। | ॥ सत्यम्॥<br><br>सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति। सत्यं शपथ तथ्ययोः । “स्यात्तथ्ये शपथे सत्यं लोके ना त्रिष्वृतान्विते। |

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

Cover Page

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | सत्यं तु सप्तमे लोके सत्सु साधुषु वाच्यवदिति शेषः। "सतीपतिव्रता गौर्योः"। "सन् सत्ये विदुषि श्रेष्ठे साधौ त्रिषु सदृक्षके।। |
| सुरागवरदः | सुराः अमराः, अगाः मेर्वादि – भूधराः, सुराश्च अगाश्च तेषां वरदः। निर्जरमेर्वादि पर्वतानामभीष्ट फलदायीति भावः। | | सुष्ठु रागेण अनुरागेण वरदः। प्रीत्या भक्ताभीष्टफलदा यीति भावः। | सुराणां देवानां अगः कल्पवृक्षः, स इव वरदः। आश्रिताभीष्टफ लप्रद इत्यर्थः। | सुष्ठु शोभनो रागो येषां ते सुरागा अक्रूरादयः तेषां वरदः। | ।। रागः।। रागोऽनुरागे मात्सर्ये" इति<br><br>।। अगः ।।<br>" अगः शैले द्रुमे भानाविति चामरः |
| गोराजसंसेवितः | गोराजेन इन्द्रेण संसेवितः। | गोराजेन बृहस्पतिना संसेवितः। | गोराजेन नंदिकेश्वरेण संसेवितः। | गोराजेन समुद्रेण संसेवितः। सेतुबंधनसमये समुद्रेण स्तूयमान इत्यर्थः। | गोराजेन ब्रह्मणा यद्वा- गोराजैर्भूपालैः संसेवितः। | ।। गौः ।।<br><br>स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" । इति । स्वर्गे वज्रे च रश्मौ च बलीवर्दे च गौः पुमान् । स्त्रीबाण |

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

Cover Page

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | रोहिणी दृग्दिग्वाग्भूमि ष्वप्सुभूम्निच" । "गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेद योः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि। अस्त्रियां स्वर्गवज्रांबु रश्मिदृग्बाणलो मसु" इति। |
| कृष्णः | सर्वं करोतीति कृष्णः डु कृञ् करणे। | दैत्यान् कर्षतीति कृष्णः। कृषविलेखने"। | | कृष्णवर्णत्वात् कृष्णः। | तन्नाम्ना प्रसिद्धः – देवकीनंदनः कृष्णः। | |

**उपसंहारः**

संस्कृतकाव्येषु अलङ्कारशास्त्रदृष्ट्या यानि उत्तमकाव्यानि, यानि च मध्यमकाव्यानि तत्तत्कवीनां *उच्चतमसञ्ज्ञानात्मककौशलानाम्* उदाहरणत्वेन प्रदर्शयितुं तथापि अवरकाव्येपि कथम् *उच्चतमसञ्ज्ञानात्मककौशलानि* प्रदर्शितानीति प्रकृतशोधलेखे प्रदर्शितम्। *अवरकाव्यमेव यदि उच्चतमसञ्ज्ञानात्मककौशलयुक्तं, तर्हि उत्तमकाव्यानां विषये वक्तव्यस्य अपेक्षैव न भविष्यति।*

संस्कृतकवीनाम् उच्चतमचिन्तनकौशलानि चित्रकाव्यरूपेण, द्व्यर्थि-त्र्यर्थि-पञ्चार्थिकाव्यरूपेण प्रकृतशोधलेखे प्रदर्शितम्।। तत्र कश्चन संस्कृतकविः किमपि विशिष्टमेव काव्यं कृतवान् यत्र सर्वैः व्यञ्जनवर्णैः तत्क्रमानुसारं काव्यं लिखितम्। अपरः कश्चन कविः केवलं **चितैरेव** व्यञ्जनवर्णैः एव चमत्कृतिपूर्णम् अन्यत्काव्यं लिखितवान्। शिशुपालवधे अद्भुतमेव द्व्यक्षरैः काव्यं, एकाक्षरकाव्यं च लिखितं कविना माघेन। पुनश्च कविना माघेन तत्रैव एकं विशिष्टं चमत्कारपूर्णं काव्यम् एवं लिखितं, यत्र एकस्मिन् पादे एकमेवाक्षरं भवति। संस्कृतकविभिः न केवलं वर्णचित्राणि, अपि तु अद्भुतानि स्थानचित्राणि स्वरचित्राणि च लिखितानि।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:11(6), November, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

सामान्यतया एकार्थसूचकरचनैव सर्वोत्कृष्टा। तत्रापि केचन कवयः द्व्यर्थिकाव्यानि त्र्यर्थिकाव्यानि, पञ्चार्थिकाव्यानि लिखितवन्तः। रामकृष्णविलोमकाव्यमित्यादिषु प्रथमपादे रामकथा, द्वितीयपादे कृष्णकथा च निबद्धा। चमत्कारपूर्णविषयस्तु द्वितीयपादः प्रथमपादस्य विलोमपठनेनाविष्क्रियते। रामकृष्णयुधिष्ठिरचरितचम्पूकाव्यम् इत्येतत् त्र्यर्थिकाव्यम्। अस्मिन्नेव काव्ये पञ्चार्थिकाव्यमपि तत्कविना लिखितम्। एतदपरमेकम् उत्तमम् उदाहरणं भवति संस्कृतकवीनाम् उच्चतमचिन्तनकौशले। एवं संस्कृतकवयः उच्चतमसञ्ज्ञानात्मककौशलैः उच्चतमचिन्तनकौशलैश्च युक्ताः सन्तीति स्फुटं ज्ञायते।

## उपयुक्तग्रन्थसूची


1. **Bhoja. (2002). *Sarasvatī-kaṇṭhābharaṇa* (R. G. Bhandarkar, Ed.).** Bhandarkar Oriental Research Institute.
2. **Bhāravi. (2008). *Kirātārjunīya* (M. R. Kale, Ed.).** Motilal Banarsidass.
3. **Daṇḍin. (1998). *Kāvyādarśa* (K. P. Trivedi, Ed.).** Motilal Banarsidass.
4. **Govinda Bhaṭṭa. (1972). *Rāma-Kṛṣṇa-Yudhiṣṭhira-Campū* (K. S. Ramaswami Sastri, Ed.).** The Adyar Library and Research Centre.
5. **Māgha. (2010). *Śiśupālavadha* (S. K. Raman, Ed.).** Motilal Banarsidass.
6. **Mammaṭa. (2004). *Kāvyaprakāśa* (P. V. Naganatha Sastri, Ed. & Trans.).** Chaukhamba Sanskrit Series.
7. **Vedānta Deśika. (2007). *Pādukā-sahasra* (S. S. Raghavan, Ed.).** Sri Viśiṣṭādvaita Research Centre.
8. chrome-extension://efaidnbmnnnibpcajpcglclefindmkaj/https://potentialplusuk.org/wp-content/uploads/2018/06/S306-Higher-Order-Thinking-Skills-180611.pdf
9. https://en.wikipedia.org/wiki/Bloom%27s_taxonomy